BARASAT GOVT COLLEGE LIBRARY

## WEST BENGAL STATE UNIVERSITY

B.A. Honours/Programme 1st Semester Examination, 2022-23

## SANHGEC01T/SANGCOR01T-SANSKRIT (GE1/DSC1)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A

1. अधोलिखितेषु पञ्च प्रश्नाः संस्कृतेन देवनागरीलिप्या च समाधेयाः – 2×5 = 10

(क) जगतः पितरौ कथं सम्पृक्तौ भवतः ?

(ख) हेम्नः शुद्धिः श्यामिका वा केन परीक्ष्यते ?

(ग) इक्ष्वाकुः कः आसीत् ?

(घ) किमर्थं दिलीपः प्रजाभ्यः करमग्रहीत् ?

(ङ) कविः रघुवंशस्य वर्णनं कथं मन्यते ?

(च) दिलीपस्य कार्यानुष्ठानं कीदृशमासीत् ?

(छ) दिलीपस्य अर्थकामौ कीदृशौ आस्ताम् ?

2. कस्यचिदेकस्य श्लोकस्य व्याख्या कार्या। 5×1 = 5

(क) मन्दः कवियशः प्रार्थी गमिष्याम्युपहास्यताम्।
प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः॥

(ख) जुगोपात्मानमत्रस्तो भेजे धर्ममनातुरः।
अगृध्नुराददे सोऽर्थमसक्तः सुखमन्वभूत्॥

अथवा

अधोलिखितेषु विषयमेकमाश्रित्य टीका लेख्या। 5×1 = 5

जगतः पितरौ, प्रणवश्छन्दः, वृद्धत्वं जरसा विना।

BARASAT GOVT COLLEGE "10 K N C Road, Barasat, Kol-124" LIBRARY

## SECTION-B

3. 'वदन्त्यपर्णेति च तां पुराविदः'– तस्या अपर्णेति नाम कथमभूत् ? पाठ्यांशमनुसृत्य तस्याः कठोरातपस्या वर्णनीया। 10

अथवा

कुमारसम्भवमिति महाकाव्यस्य पञ्चमसर्गमनुसृत्य 'उपमा कालिदासस्य' इति सूक्तिः आलोच्यताम्।

4. अधोलिखितेषु श्लोकद्वयं व्याख्येयम्। 5×2 = 10

(क) तथा समक्षं दहता मनोभवं पिनाकिना भग्नोमनोरथा सती।
निनिन्द रूपं हृदयेन पार्वती प्रियेषु सौभाग्यफला हि चारुता॥

(ख) इति ध्रुवेच्छामनुशासती सुतां शशाक मेना न नियन्तुमुद्यमात्।
क ईप्सितार्थस्थिरनिश्चयं मनः पयश्च निम्नाभिमुखं प्रतीपयेत्॥

(ग) यथा प्रसिद्धैर्मधुरं शिरोरुहैर्जटाभिरप्येवमभूत्तदाननम्।
न षट्पदश्रेणिभिरेव पङ्कजं सशैवालासङ्गमपि प्रकाशते॥

## SECTION-C

5. नीतिशतकम् इति ग्रन्थस्य मङ्गलाचरणमधिकृत्य विस्तरेण व्याख्यायताम्। 10

अथवा

नीतिशतकम् इति ग्रन्थस्य रचयिता कः ? नीतिशतकमवलम्ब्य विद्याप्रशंसा स्वभाषया आलोच्यताम्। 10

6. अधोलिखितेषु कस्यचिदेकस्य श्लोकस्य सप्रसङ्गं व्याख्या कार्या । 5×1 = 5

(क) स्वायत्तमेकान्तगुणं विधात्रा विनिर्मितं छादनमज्ञतायाः।
विशेषतः सर्वविदां समाजे विभूषणं मौनमपण्डितानाम्॥

(ख) येषां न विद्या न तपः न दानं ज्ञानं न शीलं न गुणो न धर्मः।
ते मर्त्यलोके भुवि भारभूताः मनुष्यरूपेण मृगाः चरन्ति॥

अथवा

अधोलिखितेषु विषयमेकमाश्रित्य टीका लेख्या। 5

अल्पज्ञः, ज्ञानलवदुर्विदग्धम्।

——×——

BARASAT GOVT COLLEGE LIBRARY "10 K N C Road, Barasat, Kol-124"

लक्ष्यं सिद्धमानम्

# WEST BENGAL STATE UNIVERSITY

B.A. Honours/Programme 1st Semester Examination, 2021-22

## SANHGEC01T/SANGCOR01T-SANSKRIT (GE1/DSC1)

Time Allotted: 2 Hours — Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A

1. अधोलिखितेषु पञ्च प्रश्नाः संस्कृतभाषया देवनागरीलिप्या च समाधेयाः — 2×5 = 10

(क) 'जगतः पितरौ वन्दे'—इत्यत्र जगतः पितरौ कौ ? तयोः तुलना काभ्यां सह क्रियते ?

(ख) रघुवंशमहाकाव्यस्य एकस्य टीकाकारस्य तट्टीकायाश्च नामनी लिख्येताम्।

(ग) दिलीपस्य अर्थसाधनं किमभूत् ?

(घ) प्रजानां पिता दिलीपः कथमासीत् ?

(ङ) रघुवंशमहाकाव्ये कति सर्गा विद्यन्ते ? तस्य प्रथमसर्गस्य किं नाम ?

(च) किमर्थं मेरुपर्वतेन सह महाराजस्य दिलीपस्य कालिदासेन सादृश्यमुपस्थापितम् ?

(छ) 'जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ'— इत्यत्र 'पितरौ' इति पदे कीदृशी वृत्तिरस्ति ?

2. कस्यचिदेकस्य श्लोकस्य व्याख्या कार्या। 5×1 = 5

(क) क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्॥

(ख) ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः।
गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव॥

अथवा

अधोलिखितेषु विषयमेकमाश्रित्य टीका लेख्या। 5×1 = 5

दिलीपः, संस्काराः प्राक्तना इव, वैवस्वतो मनुः।

BARASAT GOVT COLLEGE LIBRARY 10 K.N.C Road, Barasat, Kol-124

## SECTION-B

3. पाठ्यांशमवलम्ब्य प्रकृतेः वैशिष्ट्यानि उपस्थाप्यन्ताम्। 10

अथवा

''निनिन्द रूपं हृदयेन''—इत्यत्र का कस्मात् कारणात् रूपं निनिन्द ? रूपस्य सार्थकतासम्पादनाय किं कर्तुमैच्छत् इति ग्रन्थमास्थाय वर्ण्यताम्। 1+2+7

4. अधोलिखितेषु श्लोकद्वयं व्याख्येयम्। 5×2 = 10

(क) मनीषिताः सन्ति गृहेषु देवतास्तपः क्व वत्से क्व च तावकं वपुः।
पदं सहेत भ्रमरस्य पेलवं शिरीषपुष्पं न पुनः पतत्त्रिणः॥

(ख) इयेष सा कर्त्तुमबन्ध्यरूपतां समाधिमास्थाय तपोभिरात्मनः।
अवाप्यते वा कथमन्यथा द्वयं तथाविधं प्रेम पतिश्च तादृशः॥

(ग) अथाजिनाषाढधरः प्रगल्भवाक् ज्वलन्निव ब्रह्ममयेणा तेजसा।
विवेश कश्चिज्जटिलस्तपोवनं शरीरबद्धः प्रथमाश्रमो यथा॥

## SECTION-C

5. नीतिशतकस्य पाठ्यांशमवलम्ब्य मूर्खाणां चारित्रिकवैशिष्ट्यमुपवर्ण्यताम्। 10

अथवा

'क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम्'—अस्य तात्पर्यं व्याख्यायताम्। 10

6. अधोलिखितेषु कस्यचिदेकस्य श्लोकस्य सप्रसंगं व्याख्या कार्या। 5×1 = 5

(क) अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः।
ज्ञानलवदुर्विदग्धं ब्रह्माऽपि नरं न रञ्जयति॥

(ख) साहित्यसङ्गीतकलाविहीनः साक्षात्पशुः पुच्छविषाणहीनः।
तृणं न खादन्नपि जीवमानस्तद्भागधेयं परमं पशूनाम्॥

अथवा

अधोलिखितेषु विषयमेकमाश्रित्य टीका लेख्या। 5

मृगतृष्णिका, विभूषणं मौनमपण्डितानाम्।

**N.B. :** *Students have to complete submission of their Answer Scripts through E-mail / Whatsapp to their own respective colleges on the same day / date of examination within 1 hour after end of exam. University / College authorities will not be held responsible for wrong submission (at in proper address). Students are strongly advised not to submit multiple copies of the same answer script.*

——×——

BARASAT GOVT COLLEGE LIBRARY "10 K N C Road, Barasat, Kol-124"

**WEST BENGAL STATE UNIVERSITY**

B.A. Honours/Programme 1st Semester Examination, 2020, held in 2021

# SANHGEC01T/SANGCOR01T-SANSKRIT (GE1/DSC1)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

## SECTION-A

1. अधोलिखितानां पञ्चानां प्रश्नानामुत्तरं लिख्यतां संस्कृतभाषया देवनागरीलिप्या च। 2×5 = 10

(क) कथमुपहास्यतां याति वामनः ?

(ख) महीक्षितामाद्यः क आसीत् ?

(ग) राज्ञो दिलीपस्य गुणद्वयमुल्लिख्यताम्।

(घ) शैशवे यौवने स्थाविरे च रघुवंशीया राजानः किं कुर्वन्ति ?

(ङ) कथं राजा वलिमग्रहीत् ?

(च) राज्ञो दिलीपस्य को नाम परिच्छदः किं वार्थसाधनम् ?

(छ) वृद्धत्वं जरसा विना – अस्य वाक्यस्य कोऽर्थः ?

2. कस्यचिदेकस्य श्लोकस्य सप्रसंगं व्याख्या कर्तव्या। 5×1 = 5

(क) तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः।
हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा॥

(ख) आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः।
आगमैः सदृशारम्भ आरम्भसदृशोदयः॥

अथवा

अधोलिखितेषु विषयमेकमाश्रित्य टीका लेख्या। 5×1 = 5

क्षात्रो धर्मः, संवृतमन्त्रः, सूर्यप्रभवो वंशः।

BARASAT GOVT COLLEGE LIBRARY 10 K.N.C Road, Barasat, Kol-124

## SECTION-B

3. 'उपमा कालिदासस्य' इत्युक्तेः तात्पर्यं विचार्यताम्। 10

अथवा

पार्वत्याः तपश्चरणं संक्षेपेण विव्रियताम्। कथं सा अपर्णा इति कथिता ? 10

4. अधोलिखितेषु श्लोकद्वयं व्याख्येयम्। 5×2 = 10

(क) इति ध्रुवेच्छामनुशासती सुतां शशाक मेना न नियन्तुमुद्यमात्।
क ईप्सितार्थस्थिरनिश्चयं मनः पयश्च निम्नाभिमुखं प्रतीपयेत्॥

(ख) क्लमं ययौ कन्दुकलीलयापि या तया मुनीनां चरितं व्यगाह्यत।
ध्रुवं वपुः काञ्चनपद्मनिर्मितं मृदु प्रकृत्या च ससारमेव च॥

(ग) शिलाशयां तामनिकेतवासिनीं निरन्तरास्वन्तरवातवृष्टिषु।
व्यलोकयन्नुन्मिषितैस्तडिन्मयैर्महातपःसाक्ष्य इव स्थिताः क्षपाः॥

## SECTION-C

5. नीतिशतकमवलम्ब्य विद्यामाहात्म्यमुपवर्ण्यताम्। 10

अथवा

न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत्– अस्य तात्पर्यं व्याख्यायताम्। 10

6. अधोलिखितयोः कस्यचिदेकस्य श्लोकस्य सप्रसंगं व्याख्या कर्तव्या। 5×1 = 5

(क) येषां न विद्या न तपो न दानं ज्ञानं न शीलं न गुणो न धर्मः।
ते मर्त्यलोके भुवि भारभूता मनुष्यरूपेण मृगाश्चरन्ति॥

(ख) वाण्येका समलंकरोति पुरुषं या संस्कृता धार्यते।
क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम्॥

अथवा

अधोलिखितेषु विषयमेकमाश्रित्य टीका लेख्या। 5

अनन्तचिन्मात्रमूर्तिः, मदनः, भेषजसंग्रहः।

**N.B. :** *Students have to complete submission of their Answer Scripts through E-mail / Whatsapp to their own respective colleges on the same day / date of examination within 1 hour after end of exam. University / College authorities will not be held responsible for wrong submission (at in proper address). Students are strongly advised not to submit multiple copies of the same answer script.*

——×——

BARASAT GOVT COLLEGE LIBRARY 10 K.N.C. Road, Barasat, Kol-124

## WEST BENGAL STATE UNIVERSITY

B.A. Honours/Programme 1st Semester Examination, 2019

## SANHGEC01T/SANGCOR01T-SANSKRIT (GE1/DSC1)

Time Allotted: 2 Hours — Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A

1. अधोलिखितेषु पञ्च प्रश्नाः संस्कृतेन देवनागरीलिप्या च समाधेयाः – 2×5 = 10

(क) सूर्यवंशस्य प्रथमः राजा कः आसीत् ?

(ख) कस्य आदेशेन गोरूपायाः पृथिव्याः गोदोहनम् अकरोत् ?

(ग) "जगतः पितरौ वन्दे" – अत्र 'जगतः पितरौ' कौ स्तः ?

(घ) 'रघुवंशम्' महाकाव्यस्य मुख्यः टीकाकारः कः ? तस्य टीकायाः नाम किम् ?

(ङ) पराक्रमेण दिलीपः केन सह उपमितः ?

(च) कियद्दूरं रघूणां राज्यं विस्तृतमासीत् ?

(छ) 'रघुवंशम्' इति महाकाव्ये कति सर्गाः सन्ति ?

(ज) सूर्यवंशवर्णनं कविः कीदृशं प्रयासं मन्यते ?

2. अधोलिखितेषु विषयमेकम् आश्रित्य टीका लेख्या। 5×1 = 5

(क) विजिगीषुः

(ख) ज्ञाने मौनम्

(ग) प्रणवश्छन्दः।

### SECTION-B

3. अधोलिखितेषु एकः प्रश्नः समाधेयः – 10×1 = 10

(क) 'कुमारसम्भवम्' इति महाकाव्यस्य नामकरणस्य स्वार्थकत्वं विचार्यताम्।

(ख) कुमारसम्भवस्य पञ्चमसर्गस्य पाठ्यविषयस्य कथासारो लेख्यः।

(ग) 'प्रकृतेः कविः कालिदासः' -- उक्तिरियं व्याख्याताम्।

4. अधोलिखितेषु श्लोकद्वयं व्याख्येयम् – 5×2 = 1

(क) कृताभिषेकां हुतजातवेदसं त्वगुत्तरासङ्गवतीमधीतिनीम्।
दिदृक्षवस्तामृषयोऽभ्युपागमन्न धर्मवृद्धेषु वयः समीक्ष्यते॥

(ख) तथा समक्षं दहता मनोभवं पिनाकिना भग्नमनोरथा सती।
निनिन्द रूपं हृदयेन पार्वती प्रियेषु सौभाग्यफला हि चारुता॥

(ग) पुनर्ग्रहीतुं नियमस्थया तया द्वयेऽपि निक्षेप इवार्पितं द्वयम्।
लतासु तन्वीषु विलासचेष्टितं विलोलदृष्टं हरिणाङ्गनासु च॥

BARASAT GOVT COLLEGE * 10 K N C Road, Barasat, Kol-124 * LIBRARY

## SECTION-C

5. एकः प्रश्नः समाधेयः – 10×1 = 1

(क) 'नीतिशतकम्' इति ग्रन्थस्य रचयिता कः ? नीतिशतकमवलम्ब्य विद्यायाः प्रयोजनमालोच्यताम्।

(ख) नीतिशतककाव्ये मूर्खाणां चारित्रिक-वैशिष्टं कविना केन रूपेण उपस्थाप्यते तद्विषये स्वभाषया आलोच्यताम्।

6. अधोनिर्दिष्टं विषयम् एकम् आश्रित्य टीका लेख्या। 5×1 =

(क) विवेकभ्रष्टः

(ख) ज्ञानलवदुर्विदग्धम्

(ग) मृगतृष्णिका।

——×——

BARASAT GOVT COLLEGE LIBRARY 10 K N C Road, Barasat, Kol-124

**WEST BENGAL STATE UNIVERSITY**

B.A. Honours/Programme 1st Semester Examination, 2018

# SANHGEC01T/SANGCOR01T-SANSKRIT (GE1/DSC1)

## SANSKRIT POETRY

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A

1. अधोलिखितेषु पञ्च प्रश्नाः संस्कृतेन देवनागरीलिप्या च समाधेयाः। 2×5 = 10

(क) रघुवंशमिति महाकाव्यस्य रचयिता कः ?

(ख) रघुवंशमिति महाकाव्यस्य प्रथमसर्गस्य नाम किम् ?

(ग) हेम्नः शुद्धिः श्यामिका वा केन परीक्ष्यते ?

(घ) सुमेरुपर्वतः इव कः विराजते ?

(ङ) दिलीपः कथं प्रजाभ्यः करं गृहणाति स्म ?

(च) कविः रघुवंशस्य वर्णनं कथं मन्यते ?

(छ) इक्षाकुः कः आसीत् ?

(ज) दिलीपस्य पिता कः ?

2. अधोनिर्दिष्टं विषयम् एकम् आश्रित्य टीका लेख्या। 5×1 = 5

(क) कुलकम्, (ख) दिलीपः, (ग) जगतः पितरौ।

### SECTION-B

3. अधोलिखितेषु एकः प्रश्नः समाधेयः – 10×1 = 10

(क) 'उपमा कालिदासस्य' इत्युक्तेः याथार्थ्यं विचार्यम्।

(ख) 'कुमारसम्भवम्' महाकाव्यं न वेति विचार्यताम्।

(ग) 'कुमारसम्भवम्' इति महाकाव्यस्य पञ्चम सर्गमनुसृत्य पार्वत्याः कठोरतपस्यायाः वर्णनं देयम्।

4. अधोलिखितेषु श्लोकद्वयं व्याख्येयम् – 5×2 = 10

BARASAT GOVT COLLEGE * 10 K N C Road, Barasat, Kol-124 * LIBRARY

(क) मनीषिताः सन्ति गृहेषु देवतास्तपः क्व वत्से क्व च तावकं वपुः।
पदं सहेत भ्रमरस्य पेलवं शिरीषपुष्पं न पुनः पतत्रिणः॥

(ख) इति ध्रुवेच्छामनुशासती सुतां शशाक मेना न नियन्तुमुद्यमात्।
क ईप्सितार्थ स्थिरनिश्चयं मनः पयश्च निम्नाभिमुखं प्रतीपयेत्॥

(ग) यथा प्रसिद्धैर्मधुरं शिरोरुहैर्जटाभिरप्येवमभूत्तदाननम्।
न षट्पदश्रेणिभिरेव पङ्कजं सशैवलासङ्गमपि प्रकाशते॥

## SECTION-C

5. एकः प्रश्नः समाधेयः – 10×1 = 10

(क) नीतिशतकमाश्रित्य मूर्खचरित्रं वर्णनीयम्।

(ख) नीतिशतकमाश्रित्य विद्यायाः विद्यावतः च प्रशंसा समुपस्थापनीया।

6. अधोनिर्दिष्टं विषयम् एकम् आश्रित्य टीका लेख्या। 5×1 = 5

(क) वाग्भूषणम्, (ख) मूर्खरञ्जनम्, (ग) विद्याप्रकृतिः।

——×——